# मानवाधिकाराणां कृते संयुक्त-राष्ट्र-उच्चायुक्तः
# सर्वेषामपि कृते सर्वे मानवाधिकाराः

*मानवाधिकाराणां जागत-अभिघोषणायाः पंचाशत्तमा वर्षपूर्तिः ।*

# 1948-1998

*मानवाधिकाराणां जागत-अभिघोषणा*
*{अन्य-भाषा-रूपान्तराणि सामग्र्यश्च}*

***एतच्छताब्दस्य अष्टचत्वारिंशत्तमे वर्षे डिसेम्बर-मासे अभ्युपगतः अभिघोषितश्च, महासभायाः 217-अ-{3}-इत्याख्यः प्रस्तावः ।***

***प्रस्तावना***

*यत्र जगति शान्ति-न्याय-स्वातन्त्र्याणां आधारः मानव-परिवारस्य सर्वेषामपि सदस्यानां साम्यानां अखण्डितानाञ्च अधिकाराणां, पारम्परिक-गौरवस्य चाभिज्ञाने स्यात्,यत्र मानवाधिकाराणां अवमानेन अनादरेण च कार्याणि दुर्दान्तरूपेण परिणमितानि, यैः मानवीय-चेतना विक्षोभिता, अपि च,सामान्य-जनानां उच्चतमाकांक्षाः अभिघोषिताः स्युः , एवं हि नूतनविश्वारंभेण, मानवाः अभिव्यक्तेः स्वातन्त्र्यमनुभवितुं शक्ष्यन्ति, निर्भयाश्च भवितारः ,यत्र चैतत् अनिवार्यम् यदि शोषणात्याचारान् विरुध्य अन्तिम-प्रयासत्वेन मनुष्यः , प्रयासानुष्ठानार्थं नैव विवशीक्रियते चेत्तदा, मानवाधिकाराः विधि-नियमेन संरक्षणीयाः ,यत्र च राष्ट्रेषु परस्परं सख्य-सम्बन्धानां विकासजातं समुन्नेतुं परमावश्यकं स्यात्,यत्र मौलिकेषु मानवाधिकारेषु संयुक्त-राष्ट्र-संघस्य जनाः घोषणापत्रे स्वीयास्थां दृढीकृतवन्तः , बृहत्तरे च स्वातन्त्र्ये भद्रतरं जीवनस्तरं सामाजिक-प्रगतिं च समुन्नेतुं निर्णीतम्, स्त्री-पुरुषाणां साम्याधिकारेषु मानव-व्यक्तेः गौरवे मूल्ये च निष्ठा दृढीकृता,यत्र, सदस्यदेशाः मौलिक-स्वातन्त्र्याणां मानवाधिकाराणाञ्च परिपालनार्थं वैश्विकादरस्य समुन्नतये च, संयुक्त-राष्ट्र-संघेन संभूय प्रतिश्रुताः स्युः ,यत्र स्वीय-प्रतिश्रुतीनां परिपूर्णतायै एतेषां अधिकाराणां स्वातन्त्र्याणां च सामान्यावगमनं महत्तमं महत्त्वाधायि च स्यात्,तदर्थं साम्प्रतम्,महासभा सर्वेषां राष्ट्राणां सर्वेषां च जनानां कृते सामान्योपलब्धि-स्तर-रूपेण मानवाधिकाराणां एनां जागताभिघोषणां अभिघोषयति। समाजस्य प्रत्येकमपि अंगम्, प्रत्येकमपि जनः , मनसि सततं अभिघोषणामेनां निधाय, एतेषां अधिकाराणां स्वातन्त्र्याणां च कृते सम्मानं समुन्नेतुं शिक्षाध्यापनार्थं प्रयतिष्यते, अपि च, स्वीय-क्षेत्राधिकारान्तर्गतं क्षेत्रवास्तव्येषु जनेषु स्वेषु च सदस्यदेशेषु तदीयेषु जनेषु च स्वीय-वैश्विक-प्रभावि-परिपालनाभ्युपगमनानि संरक्षितुं आन्ताराष्ट्रिकाणां राष्ट्रिकाणाञ्च प्रगतिशीलोपायानां च माध्यमेन प्रयतिष्यते।*

***अनुच्छेदः*** 1

सर्वे मानवाः स्वतन्त्राः समुत्पन्नाः वर्तन्ते अपि च, गौरवदृशा अधिकारदृशा च समानाः एव वर्तन्ते। एते सर्वे चेतना-तर्क-शक्तिभ्यां सुसम्पन्नाः सन्ति। अपि च, सर्वेऽपि बन्धुत्व-भावनया परस्परं व्यवहरन्तु।

अनुच्छेदः 2

अस्यां अभिघोषणायां निर्दिष्टाः सर्वेऽपि अधिकाराः सर्वाण्यपि च स्वातन्त्र्याणि, विनैव जाति-वर्ण-लिंग-भाषा-धर्म-राजनीतिक-तदितर-मन्तव्यादि-भेदम्, राष्ट्रीयं सामाजिकाधारं सम्पज्जन्म-तदितर स्तरञ्च अविगणय्य, अधिगन्तुं सर्वोऽपि जनः प्रभवति। एतदतिरिक्तम्, कस्याश्चिदपि प्रभुसत्तायाः नियमनान्तर्गतम्, स्वाधीनस्य आत्मप्रशासनेतर-तन्त्रस्य, न्यासितन्त्रस्य वा वास्तव्यस्य प्रदेशस्य देशस्य वा राजनीतिक-सीमा-निबन्धनान्ताराष्ट्रिक-स्तराधारेण न कोऽपि भेदो विधास्यते।

अनुच्छेदः 3

सर्वोऽपि जनः जीवन-स्वातन्त्र्य-सुरक्षाधिकारं संधत्ते।

अनुच्छेदः 4

न कमपि जनं दासत्वेन पराधीनत्वेन वा धारयितुं अनुज्ञास्यते। अपि च दासव्यापारः पूर्णरूपेण प्रतिषिद्धः स्थास्यति।

अनुच्छेदः 5

न कमपि जनं विरुध्य अवमाननात्मकं व्यवहारं दण्डं वा क्रूरं अमानवीयं प्रतोदनं वा प्रवर्तयितुं अनुज्ञास्यते।

अनुच्छेदः 6

विधेः समक्षं सर्वोऽपि जनः सर्वत्र अभिज्ञातुं अधिकारं संधत्ते।

अनुच्छेदः 7

विधेः समक्षं सर्वेऽपि तुल्याः समानाश्च वर्तन्ते। अपि च विनैव कमपि भेदं विधेः तुल्यं संरक्षणमवाप्तुं अर्हन्ति। अस्याः अभिघोषणायाः उल्लंघने कमपि भेदं, एतादृग्भेदं वा अभिलक्ष्य कामपि चेष्टां विरुध्य समान-संरक्षणार्हाः सर्वेऽपि वर्तन्ते।

अनुच्छेदः 8

विधिना संविधानेन वा प्रदत्तानां मौलिकाधिकाराणामुल्लंघन-कार्याणां कृते, योग्यैः राष्ट्रीय-न्यायपीठैः संस्तुतानां प्रभाविनां समुपायानां प्रयोगार्हो हि सर्वो जनोऽस्ति।

अनुच्छेदः 9

न कोऽपि जनः स्वेच्छया निग्रहीतुं, धर्तुं, निष्कासयितुं वा अनुज्ञास्यते।

अनुच्छेदः 10

सर्वोऽपि जनः , स्वं विरुध्य प्रवर्त्तितस्य कस्यापि आपराधिकाक्षेपस्य, स्वीयाधिकाराणां दायित्वानां च, विनिर्धारणस्य च कृते, स्वाधीनेन निष्पक्षेण च न्यायपीठेन विधीयमानस्य समुचितस्य सार्वजनिकस्य श्रवणस्य च कृते सर्वोऽपि जनः पूर्णां समानतां धारयति।

अनुच्छेदः 11

प्रत्येकमपि जनः , विधेरनुसारेण यावदवधि सार्वजनिकाभियोग-प्रकरणे प्रमुखापराध-सिद्धिं नैव भजते, तावत्पर्यन्तं निर्दुष्टः इत्यामंस्यते। अपि च, स्वीय-प्रतिरक्षार्थं तेन जनेन सर्वमपि आवश्यक-प्रतिभूतिजातं उपपादनीयं वर्तते।
आन्ताराष्ट्रिकस्य राष्ट्रिकस्य च विधेरन्तर्गतम् प्रमुखापराध-निष्प्रभावकस्य कस्यापि कार्यस्य कारणात् न कोऽपि प्रमुखापराधार्थं अपराधीति गणयिष्यते। न वा, प्रमुखापराध-काले प्रवर्तनीय-दण्ड-दानात् नाधिकतरो दण्डः कस्मिंश्चिदपि प्रवर्तनीयो भविता।

अनुच्छेदः 12

द्वादशोऽनुच्छेदः न कस्यापि व्यक्तिगते पारिवारिके च जीवने, गृहे, पत्रव्यवहारे च स्वेच्छया हस्तक्षेपोऽनुज्ञास्यते, न वा कस्यापि ख्यातिं सम्मानं वाक्रान्तुं कोऽपि शक्ष्यति। एताहक्-हस्तक्षेपाक्रमणानि विरुध्य प्रत्येकमपि-जनः विधि-संरक्षणं संधत्ते।

अनुच्छेदः 13

प्रत्येकमपि राष्ट्रस्य सीम्नि आवासस्य गमनागमनस्य च स्वातन्त्र्याधिकारं प्रत्येकमपि जनः संधारयति।स्वदेशोपेतं कमपि देशं त्यक्तुं स्वदेशं च प्रत्यागन्तुं प्रत्येकमपि अधिकृतोऽस्ति।

अनुच्छेदः 14

उपद्रवेभ्यो रक्षितुं अन्यदेशेषु शरणमधिगन्तुं प्रत्येकमपि अधिकारं संधत्ते।संयुक्तराष्ट्रसंघस्य सिद्धान्तानां उद्देश्यानां च प्रतिकूलकार्येभ्यः राजनीतिकेतरापराधेभ्यश्च समुत्थितेषु वास्तविकाभियोग-प्रकरणेषु अधिकारोऽयं नैव प्रभविता।

अनुच्छेदः 15

प्रत्येकमपि राष्ट्रियतायाः अधिकारं धारयति।न कोऽपि स्वेच्छया स्वीयराष्ट्रीयतातो वञ्चितः स्यात्, न वा स्वीय-राष्ट्रीयता-परिवर्तनाधिकारात् प्रत्याख्यातो भवेत्।

अनुच्छेदः 16

जाति-धर्म-राष्ट्रीयता-नियमनं विनैव पूर्ण-वयस्काः स्त्री-पुरुषाः , परिवारं प्रतिष्ठापयितुं विवाहाधिकारवन्तो वर्त्तन्ते। विवाहार्थं, विवाहावसरे, विवाह-विच्छेदे वा ते समानाधिकारान् संधारयन्ति। विवाहेच्छुकानां पूर्ण-स्वतन्त्र-सहमत्यैव विवाह-संस्कारः

अनुष्ठेयोऽस्ति।परिवारस्तु, समाजस्य स्वाभाविको मौलिकश्च वर्गीयैकांशो वर्तते, अपि चायं समाजेन राष्ट्रेण वा संरक्षणीयोऽस्ति।

अनुच्छेदः 17

प्रत्येकमपि अन्येषां सहयोग-पुरस्सरं एकाकि एव वा सम्पत्संधारण-स्वामित्वाधिकारं संधत्ते। न कोऽपि स्वेच्छया स्वीयसंपत्स्वामित्वाधिकारात् वञ्चितो भवेत्।

अनुच्छेदः 18

प्रत्येकमपि विचाराणां चेतनायाः धर्मस्य च स्वातन्त्र्याधिकारं संधत्ते। अस्मिन् अधिकारे, स्वीयं धर्मं विश्वासं वा शिक्षयितुं अभ्यस्तुं अर्चितुं परिपालयितुं वा, वैयक्तिके सामाजिके च जीवने, अन्यैश्च सह सामुदायिकजीवने एकाकिना वा स्वीयं धर्मं विश्वासं स्वातन्त्र्यं च परिवर्तयितुमपि प्रत्येकं जनः स्वातन्त्र्यं धारयति।

अनुच्छेदः 19

प्रत्येकमपि मन्तव्याभिव्यक्त्योः अधिकारं संधत्ते। सीमाव्यवधानं अविगणय्य, केनापि संचार-माध्यमेन विचाराणां सूचनानां च आदान-प्रदानार्थं विनैव हस्तक्षेपं कश्चिदपि जनः, स्वीय-मन्तव्य-संधारणार्थं अधिकारेऽस्मिन् अर्हिष्यते।

अनुच्छेदः 20

प्रत्येकमेव जनः शान्तिपूर्णरीत्या सम्मिलितुं संघटनानि च विरचयितुमर्हो वर्तते।केनचिदपि संघटनेन सह आत्मानं संयोजयितुं न कोऽपि विवशीकर्तुं शक्यते।

अनुच्छेदः 21

स्वीयराष्ट्रस्य प्रशासने प्रत्यक्षरीत्या अथवा निष्पक्षनिर्वाचित-प्रतिनिधि-माध्यमेन प्रत्येकं जनः सहभागिभवितुमर्हति। प्रत्येकं जनस्तदीये राष्ट्रे लोकसेवायाः तुल्यमधिकारं संधत्ते। लोकेच्छया प्रशासनाधिकारो विरचयिष्यते; इयमिच्छा कालबद्धैः नियमोचितैश्च निर्वाचनैः प्रकाश्यम् आगन्त्री; इमानि निर्वाचनानि च वैश्विकं तुल्यं गुप्तं मतदानेन अथवा तुल्यमेवेतरेण मतदानविधिना भवितारः ।

अनुच्छेदः 22

प्रत्येकमेव जनः, सामाजिकत्वात्, सामाजिक-सुरक्षाया अधिकारं सन्धारयति; असौ हि राष्ट्रीयप्रयासेन आन्ताराष्ट्रीयसहयोगे न च प्रत्येकं राज्यस्य संघटन-संसाधनानुरूपम्, स्वीयाविभाज्यार्थिक-सामाजिक-सांस्कृतिकाधिकाराणां प्रतिष्ठायै, स्वीयव्यक्तित्वस्य उन्मुक्त {सर्वांगीण} विकासार्थं च संसिद्धिं अर्हति।

अनुच्छेदः 23

*प्रत्येकमपि निर्वृत्तितां विरुध्य संरक्षणमधिगन्तुं, अनुकूल-कार्य-स्थितीनां न्यायीकरणमवाप्तुं स्वतन्त्र-वृत्तिता-चयनं विधातुं कार्याणि चानुष्ठातुं अधिकारं धत्ते।प्रत्येकम्, विनैव भेदम्, सम-कार्यार्थम्, समान-वेतनमानं {पारिश्रमिकं} अधिगन्तुं अधिकृतोऽस्ति। कार्यनिरतः प्रत्येकमपि जनः , स्वस्य स्वीय-परिवारस्य च मानवीय-गौरव-युतस्य अस्तित्वस्य संरक्षणार्थं समुचितानुकूल-पारिश्रमिकादानस्य अधिकारं धारयति। आवश्यके सति चासौ सामाजिक-संरक्षणस्य अन्योपायैः एतत्पूरयितुं अर्हिष्यते। स्वीयहितानां संरक्षणार्थं प्रत्येकम् श्रमिकसंघटनैः साकं आत्मानं संयोजयितुं एतादृक्-संघटनं वा संरचयितुं अधिकृतोऽस्ति।*

**अनुच्छेदः 24**

*कार्यहोराणां समुचित-नियमन-पुरस्सरम्, सवेतनं च नियतावधिकावकाशेन सह विश्रमाधिकारः प्रत्यकस्मै प्रदेयोऽस्ति।*

**अनुच्छेदः 25**

*प्रत्येकं जनः खाद्य-वस्त्रावास-चिकित्सोपचर्यादिभिः , आवश्यक-सामाजिक-सेवाभिश्च सह स्वस्य स्वीयपरिवारस्य च अनामयतायै स्वस्थतायै च पर्याप्तं जीवनस्तरं संधारयितुं अधिकृतोऽस्ति। अपि च, नियन्त्रण-शून्यासु परिस्थितिषु अन्यस्मिन् जीवकोपार्जनाभावे वृद्धावस्थायां, वैधव्यप्राप्तौ, अयोग्यतायां, रुग्णतायां निर्वृत्तितायां च सत्याम्, प्रत्येकमपि सुरक्षाधिकारं सन्धारयति। मातृत्वस्य शिशुत्वस्य च कृते विशिष्टसाहाय्योपचर्याजातं प्रदेयं भविता। अवैधाः वैधाश्च सर्वेऽपि बालाः , समानं सामाजिकं संरक्षणं अवाप्तुं अर्हिष्यन्ति।*

**अनुच्छेदः 26**

*प्रत्येकमपि जनः शिक्षाधिकारं संधत्ते। प्राथमिकेषु, मौलिकस्तरेषु च शिक्षा निःशुल्का वर्तिता। प्राथमिकी शिक्षा अनिवार्या भविता। प्राविधिकी व्यावसायिकी च शिक्षा सामान्यतया उपपादयिष्यते, उच्चतरशिक्षा च, सर्वेषामपि कृते योग्यताधारेण समानरूपेण प्राप्या भविता। शिक्षैषा मानवीय व्यक्तित्वस्य सर्वांगीण-विकासं प्रति निर्दिष्टा भविता अपि चैषा मौलिक स्वातन्त्र्याणां मानवाधिकाराणां च कृते सम्मान-संवर्धिका भविता। सर्वेस्वपि राष्ट्रेषु जातीयेषु धार्मिकेषु-वा वर्गेषु शिक्षैषा। सख्यसहिष्णुता-सद्भाव-संवर्धिका वर्तिता। अपि चैषा, शान्ति-संधारणार्थं संयुक्त राष्ट्रसंघस्य कार्याणि इतोऽप्यग्रे प्रसारयिष्यति। बालानां कृते प्रदेयां शिक्षां चेतुं पितरौ प्राथम्याधृतं अधिकारं धारयतः ।*

**अनुच्छेदः 27**

*विविधकलानां आनन्द-सन्दोहमनुभवितुं वैज्ञानिको-पलब्धीनां लाभान् च संविभक्तुं विभिन्नानां समुदायानां सांस्कृतिक-जीवने च स्वतन्त्रतया सहयोक्तुं सर्वोऽपि जनः अधिकारयुतोऽस्ति।*
*कस्यापि वैज्ञानिक-साहित्यिक-कलात्मकानां निर्माणानां, यस्यासौ रचयितास्ति, नैतिकानां वस्तुगतानां हितानां संरक्षणार्थं प्रत्येकं जनोऽधिकारं संधत्ते।*

**अनुच्छेदः 28**

अस्यां अभिघोषणायां निर्दिष्टानां अधिकाराणां स्वातन्त्र्याणां च प्राप्तये सामाजिकान्ताराष्ट्रिक-व्यवस्थायां च पूर्णतया एतान् अधिगन्तुं प्रत्येकमपि जनोऽर्हिष्यते।

**अनुच्छेदः 29**

प्रत्येकं जनः समुदायस्य कृते कर्तव्यदायित्वं धारयति येन हि स्वीय-व्यक्तित्वस्य पूर्ण-स्वतन्त्र-विकासः संभवेत्। स्वीयाधिकार-स्वातन्त्र्याणां क्रियान्वयने प्रत्येकम् जनः, अन्येषां अधिकार-स्वातन्त्र्याणि प्रति समुचिताभिज्ञानादर-संरक्षणदृशा नूनं व्यवहरिष्यति। अपि चासौ लोकतान्त्रिक-समाजे, सामान्य-कल्याणं सार्वजनिक-व्यवस्थां नैतिकतायाः समुचितावश्यकताश्च प्रति पूर्णं दायित्वं निर्वक्ष्यति। एतेऽधिकाराः एतानि स्वातन्त्र्याणि च, संयुक्तराष्ट्रसंघस्य उद्देश्यानि सिद्धान्तान् च विरुध्य न कथमपि प्रयोक्ष्यन्ते।

**अनुच्छेदः 30**

अस्यां अभिघोषणायां निर्दिष्टानां अधिकाराणां स्वातन्त्र्याणां च न कोऽप्यंशः, प्रणाश-लक्ष्याधारेण किमपि कार्यमनुष्ठातुं एतादृक्कार्यानुष्ठानार्थं वा कस्यचित् राष्ट्रस्य वर्गस्य जनस्य वा समीहित-सिद्धयर्थं अन्यथा व्याख्यातुं नैव शक्ष्यते।

---

स्वत्वाधिकारः 1997
मानवाधिकाराणां कृते संयुक्तराष्ट्रोच्चायुक्तस्य कार्यालयः
जिनेवा, स्वीट्ज़रलैण्ड

विकासः संभवेत्।
स्वीयाधिकार स्वातन्त्र्यानां क्रियान्वयने प्रत्येकम् जनः, अन्येषां अधिकार स्वातन्त्र्याणि प्रति समुचिताभिज्ञानादर संरक्षणदृशा नूनं व्यवहरिस्यति। अपि चासौ लोकतान्त्रिक समाजे, सामान्य कल्याणं सार्वजनिक व्यवस्थां नैतिकतायाः समुचितावश्यकताश्च प्रति पूर्णं दायित्वं निर्वक्ष्यति। एतेऽधिकाराः एतानि स्वातन्त्र्याणि च, संयुक्तराष्ट्रसंघस्य उद्देश्यानि सिद्धान्तान् च विरुध्य न कथमपि प्रयोक्ष्यन्ते।
अनुच्छेदः 30
अस्यां अभिघोषणायां निर्दिस्टानां अधिकाराणां स्वातन्त्रयानां च न कोऽप्यंशः, प्रणाश लक्ष्याधारेण किमपि कार्यमनुस्ठातं एतादृक्कार्यानुस्ठानार्थं वा कस्यचित् राष्ट्रस्य वर्गस्य जनस्य वा समीहित सिद्धयर्थं अन्यथा व्याख्यातुं नैव शक्ष्यते।
स्वत्वाधिकारः 1997
मानवाधिकाराणां कृते संयुक्तराष्ट्रोच्चायुक्तस्य कार्यालयः
जिनेवा, स्वीट्ज़रलैण्ड